श्रीकुण्डं शालितीर्थञ्च नैमिषेयञ्च विश्रुतम्। ब्रह्मस्थानं सोमतीर्थं कन्यातीर्थं तथोत्तरम्। ब्रह्मतीर्थं मनस्तीर्थं तीर्थञ्चैलावनन्तथा। सौगन्धिकवनञ्चैव मणितीर्थं सरस्वती। ईशानतीर्थं प्रवरं पावनं पाञ्चयज्ञिकम्। त्रिशूलधारा माहेन्द्रं देवस्थानं कृतालयम्। शाकम्भरी देवतीर्थं स्वर्णाख्यं कालियं ह्रदम्। क्षीरेश्वरं विरूपाक्षं भृगुतीर्थं कुशोद्भवम्। ब्रह्मतीर्थं ब्रह्मयोनिं नीलपर्व्वतमेव च। कुब्जाम्रकं भद्रवटं वशिष्ठपदमेव च। धूमावर्त्तं तथा मेकं वारुणं कपिलञ्च यत्। स्वर्गद्वारं प्रजाद्वारं कालिकाश्रममेव च। रुद्रावर्त्तं सुगन्धाश्वं कपिलावनमेव च। भद्रकर्णह्रदञ्चैव शङ्कुकं ह्रदकं तथा। सप्तसारस्वतञ्चैव तीर्थमौशनसं तथा। कपालमोचनञ्चैव नरकञ्चैव काम्यकम्। तत्र सामुद्रिकञ्चैव शतिकञ्च सहस्रिकम्। रेणुकं पञ्चवटकं विमोचनमथौजसम्। विश्वेश्वरं वामनकं कच्चं नारायणाश्रमम्। गङ्गाह्रदं वटञ्चैव वदरीपचनन्तथा। ऐन्द्रमार्गमेकरात्रं क्षीरिकाराममेव च। सोमतीर्थं दारवञ्च श्रुततीर्थञ्च भो द्विजा !। कन्याश्रमं सन्निहितं कोटितीर्थञ्च पुन्नदी। कोटितीर्थस्थलीञ्चैव भद्रकालीह्रदन्तथा। अरुन्धतीवनञ्चैव ब्रह्मावर्त्तन्तथोत्तमम्। अश्ववेदी कुब्जवनं यमुनाप्रभवं तथा। वीरप्रमोक्षं सिन्धूत्थं शमीकुल्या सकृत्तिका। उर्व्वशीक्रमणञ्चैव मायाविद्योद्भवन्तथा। महाश्रमो वेतसिकारूपं सुन्दरिकाश्रमम्। ब्रह्मतीर्थन्तु वैश्वासं गङ्गोद्भेदं सरस्वती। अरुणोदं तथा चान्द्रं शक्रतीर्थं सवालुकम्। तीर्थञ्चैवाविमुक्ताख्यं नीलकण्ठह्रदन्तथा। स्वर्गद्वारं किम्पुलिका तीर्थकोटिस्तथैव च। पिशाचमोचनञ्चैव सुभद्राह्रदमेव च। कुण्डं विमलदं तस्यां तीर्थं चण्डेश्वरस्य च। ज्येष्ठस्थानह्रदञ्चैव हरिकेशवनं तथा। अजामुखवनञ्चैव घण्टाकर्णह्रदन्तथा। पुण्डरीकह्रदञ्चैव वापीकर्क्कोटिकन्तथा। कुण्डं घर्घरिकायाश्च श्यामाकं पञ्चपुण्यदम्। श्मशानशुम्भकुण्डञ्च विनायकह्रदन्तथा। कूपं सिद्धभवञ्चैव पुण्यं ब्रह्मसरन्तथा। रुद्रावासं तथा तीर्थं नागतीर्थं सुलोमकम्। भृङ्गतीर्थं महातीर्थं श्रेष्ठा चैव महानदी। दिव्यं ब्रह्मसरः पुण्यं गयाशीर्षाक्षयं वटम्। दक्षिणञ्चोत्तरञ्चैव गोमयं रूपशान्तिकम्। कपिह्रदं गृध्रकूटं सावित्रीह्रदमेव च। प्रभासनं शीतवनं योनिद्वारञ्च धेनुकम्। रम्यकं कोकिलाख्यञ्च मतङ्गह्रदमेव च। पितृकूपं रङ्गतीर्थं शक्रतीर्थं सुमालिनम्। ब्रह्मस्थानं सप्तकुण्डं मणिरत्नह्रदन्तथा। मुद्गलस्याश्रमञ्चैव मुद्गल्याह्रदमेव च। तीर्थं जनककूपाख्यं वैश्यं विनशनन्तथा। आद्यं विनाशतीर्थञ्च धारा माहेश्वरी तथा। देवपुष्करिणी रम्या पर्य्यङ्ककूपमेव च। जातिस्मरं वामनकं वटेश्वरह्रदन्तथा। कौशाख्यं भरतञ्चैव तीर्थं श्रेष्ठात्मिका तथा। विश्वेश्वरं कल्पशतं कन्यासायुज्यमेव च। वाराहकं कोटितीर्थं कुमारं सर्व्वतीर्थकम्। वीराश्रमं ब्रह्मसरो वीरवीरा च तापिनी। कुमारधारा श्रीधारा गौरीशिखरमेव च। कुम्भकर्णपदञ्चैव कौशिकीह्रदमेव च। धर्म्मतीर्थं कामतीर्थं तीर्थमुद्दालकं तथा। दण्डा विमालिनी तीर्थं तीर्थञ्चैव नरेभिका। सन्ध्यातीर्थं कारतोयं कपिलालोहितार्णवम्। सोमोद्भवं वंशगुल्ममृषभं कालतीर्थकम्। पुण्यतीर्थह्रदं तीर्थं तीर्थं वदरिकाश्रमम्। रामतीर्थं सिन्धुवनं विरजातीर्थमेव च। मार्कण्डेयवनञ्चैव कृष्णतीर्थं तथा वटम्। ध्रुवं स्वरूपं प्रवरमिन्द्रद्युम्नसरश्च यत्। सानुगर्त्तं समाहेन्द्रं श्रीतीर्थं श्रीवनन्तथा। दृषतीर्थञ्चर्षभञ्च कावेरीतीर्थमेव च। कन्यातीर्थञ्च गोतीर्थं गोमतीस्थानमेव च। संवर्त्तस्थापिनी स्थानं सप्तगोदावरीह्रदम्। वदरीह्रदमन्यञ्च ब्रह्मतृष्णाविकर्त्तनम्। जातिह्रदं वेदह्रदं कुशप्रवणमेव च। सर्व्वदेवव्रतञ्चैव कन्याश्रमह्रदन्तथा। तथान्यत् वालिखिल्लानां सप्तर्षीणां तथा परम्। तथान्यञ्च महर्षीणामखण्डितह्रदन्तथा। तीर्थेष्वेतेषु विधिवत् सम्यक् श्रद्धासमन्वितः। स्नानं करोति यो मर्त्यः सर्व्वपापैः प्रमुच्यते। अभ्यर्च्य देवतास्तत्र स्थित्वा च रजनीत्रयम्। पृथक् पृथक् फलं तेषु प्रतितिष्ठंस्व भो द्विजाः !। प्राप्नोति हयमेधस्य फलं प्राप्नोत्यसंशयम्। यस्त्विदं शृणुयान्नित्यं तीर्थमाहात्म्यमुत्तमम्। पठेच्च श्रावयेद्वापि सर्व्वपापैः प्रमुच्यते"।

पद्मपुराणे श्राद्धे प्रशस्ततीर्थानि उक्तानि यथा

भीष्म उवाच। "कस्मिन् वासरभागे तु श्राद्धं श्राद्धी समाचरेत्। तीर्थेषु केषु वै श्राद्धं कृतं बहुफलं भवेत्। पुलस्त्य उवाच। तीर्थन्तु पुष्करं नाम पुण्यं श्रेष्ठतमं स्मृतम्। सर्व्वेषां द्विजमुख्यानां मनोरथस्थितं तथा। यत्र दत्तं हुतं सर्व्वमनन्तं मुनिरब्रवीत्।